National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2026; 1(66): 251-256
© 2026 NJHSR
www.sanskritarticle.com

**प्रो. प्रभाकरप्रसादः**
आचार्यः, सर्वदर्शनविभागः,
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नव देहली- १६

**Correspondence:**
**प्रो. प्रभाकरप्रसादः**
आचार्यः, सर्वदर्शनविभागः,
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नव देहली- १६

# अद्वैतिनां ब्रह्मतत्त्वम्

**प्रो. प्रभाकरप्रसादः**

**अचिन्त्याव्यक्तरूपाय निर्गुणाय गुणात्मने।**
**समस्तजगदाधारमूर्तये ब्रह्मणे नमः।।**

अथ व्याससूत्रमिदं नेत्रं विदुषां ब्रह्मदर्शने[1] इत्युक्तरीत्या ब्रह्मतत्त्वनिर्णये वेदान्तवाक्यानां तात्पर्यनिर्णयानुकूलन्यायनिबन्धनात्मकं ब्रह्ममीमांसाशास्त्राभिधं ब्रह्मसूत्रमेव शरणमिति विदितमेव विदुषाम्। अतः ब्रह्मसूत्राणां तात्पर्यनिश्चयेनैव श्रौतब्रह्मतत्त्वनिर्णयो भवतीति तदत्र सङ्क्षेपेण ब्रह्ममीमांसाधिकरणानां केषाञ्चन विमर्शमुखेन श्रीशङ्करभगवत्पादानां मते ब्रह्मसूत्राणां तात्पर्यं कुत्रेति विविच्यते।

श्रीशङ्करभगवत्पादा हि- "एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः। अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते। यथाचायमर्थः सर्वेषां वेदान्तानां तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः"[2] इति प्रतिज्ञापूर्वकं ब्रह्मसूत्रभाष्यारम्भं कुर्वन्ति। अनेनेदं ज्ञायते ब्रह्मसूत्राणां तात्पर्यमद्वितीयब्रह्मण्येवेति श्रीशङ्करभगवत्पादानामाशयः। अत्राद्वितीयब्रह्मणि तात्पर्यं नाम ब्रह्मसमसत्ताकं वस्त्वन्तरं नास्ति, ब्रह्मैव परमसत्यम्, ब्रह्म च सच्चिदानन्दरूपं निर्धर्मकम्। एतादृशब्रह्मापरोक्षज्ञानेनाविद्यानिवृत्तौ अविद्यानिवृ-त्त्युपलक्षित आत्मभाव एव मोक्षः। अतः ब्रह्मसूत्राणामज्ञातं ब्रह्म विषयः ज्ञातं ब्रह्म प्रयोजनमिति भावः। **"प्राणा वै सत्यं तेषामेष सत्यम्"**[3] इति श्रुतिः प्रधानभूतप्राणग्रहणोपलक्षितप्रपञ्चापेक्षया परमात्मनः एष सत्यमित्यत्र एष इति पदेन परमार्थसत्यत्वम् परमात्मसमसत्ताकवस्त्वन्तराभावञ्च बोधयति स्पष्टम्। श्रीमद्भागवतमहापुराणाञ्च ब्रह्मादिदेवानां मुखेन श्रावयति तत्त्वमिदम्-

**"सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितं च सत्ये।**
**सत्यस्य सत्यमृतसत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः।।**[4]

इति। सूतसंहिता च-

**"वेदाः सर्वे पुराणानि स्मृतयो भारतं तथा।**
**अस्मिन्नर्थे स्वसंवेद्ये पर्यवस्यन्ति नान्यथा ।।**[5]

इत्यत्र स्वसंवेद्य इति पदेन सर्वव्यवहारसाक्षिभूतात्मन एव ब्रह्मत्वप्रतिपादककेवलाद्वैतवाद एव श्रुतिस्मृतिपुराणेतिहासानां तात्पर्यं सम्यगुद्घोषयति । एवं

**सर्वे हि तावद्वेदान्ताः पौर्वापर्येण वीक्षिताः।**
**ऐकान्तिकाद्वैतपरा द्वैतमात्रनिषेधतः ।।**[6] **इति ।।**

ब्रह्मश्रेणिकं ब्रह्मसमानसत्ताकं वस्त्वन्तरं नास्तीति प्रतिपादनमुखेन ब्रह्मण एव श्रेष्ठत्वबोधकः सद्विद्यापदबोध्य औपनिषदां सिद्धान्तत्वेनास्तिकशिरोमणिभिः श्रीमदुदयनाचार्यप्रभृतिभिः स्वीकृतोऽयं सिद्धान्तः श्रीशङ्करभगवत्पादानां भाष्ये दर्शितः ब्रह्ममीमांसासूत्रारूढ इति भाष्यविमर्शमुखेन सूत्रविमर्शमुखेन च यथामति अत्र प्रदर्श्यते। यद्यपि भाष्यस्य विमर्शस्यापेक्षैव नास्ति भाष्येऽयं सिद्धान्तः

स्फुट एव तथापि भाष्ये क्वचित् क्वचित् सविशेषब्रह्मवादोऽपि वर्णितः, अतः भाष्यस्य तात्पर्यं सविशेषब्रह्मवादे इति भ्रमो मा भूदिति तस्यापि विमर्शमुखेन भाष्यस्यास्मिन् सिद्धान्ते तात्पर्यमिति प्रतिपादनमपेक्षितमतः तदिह प्रदर्श्यते।

आत्मानात्मनोः विरुद्धस्वभावयोरध्यासो भवितुं नार्हतीति पूर्वपक्ष-पूर्वकं यद्यपि तत्त्वतोऽध्यासाभावेऽपि अनाद्यज्ञाननिबन्धनोऽध्यासः सर्वैरनुभूयते, अतः अध्यासस्य हेतुभूतस्याज्ञानास्य प्रहाणायात्मै-कत्वविद्याबोधनमेव वेदान्तानामुद्देश्यमिति ब्रह्मसूत्राणां तात्पर्य-प्रदर्शनार्थं भाष्यमिदं प्रवृत्तमिति भगवत्पादैः जिज्ञासाधिकरणो-पक्रमे प्रतिज्ञातमिति पूर्वमुक्तमेवात्र। अत्रापातत इदमनुपपन्नमिव भाति, यतः आत्मैकत्वं सूत्रकाराणामभिप्रेतश्चेद् अथात आत्मजिज्ञासा इति सूत्रेण शास्त्रमारभ्येत, किन्तु **"अथातो ब्रह्मजिज्ञासेति"** शास्त्रमारभ्यमाणं दृश्यते। ब्रह्मणि च भेदप्रसक्तिरेव नास्ति, नास्तिकैः ब्रह्मण एवानङ्गीकारात्, ईश्वरवादिभिश्चेश्वर-स्यैकत्वस्यैवाङ्गी-कारात् आत्मशब्दश्च जीवे ईश्वरे च प्रयुज्यत इत्यात्मनि तु भेदः प्रसक्तः। जीव आत्मशब्दो यथा' न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति" इति।[7] **"आत्मा वा इदमेक एवाग्र आसीत्"[8]** इत्यत्र ईश्वर आत्मशब्दः प्रयुक्त। "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः"[9] अत्र तु जीवेश्वरयोः साधारणरूपेणात्मशब्दः प्रयुज्यत इति स्पष्टमेव प्रतीयते। एतस्मादित्यनेन प्रत्यक्षगम्यस्य जीवात्मनः, तस्मादित्यनेन परोक्षसिद्धस्येश्वरस्य बोधो भवति। नैयायिकाः अपि "आत्मा द्विविधः जीवात्मा परमात्मा चेति'[10] आत्मशब्दस्य उभयत्र प्रयोगं कुर्वन्ति। अतः "अथातो ब्रह्मजिज्ञासां इति सूत्रयद्भिः सूत्रकारैः आत्मनो जीवाद्भिन्नस्येश्वरस्य जिज्ञासा प्रतिज्ञातेति निश्चीयते। अत्रोच्यते-

आत्मशब्दः **"आत्मा जीवे धृतौ देहे स्वभावे परमात्मनि"[11]** इत्यभिधानकोशानुसारेण **"य आत्मनि विष्ठन्नित्यादिप्रयोगण"** चानेकार्थवाचकः अस्ति। ब्रह्मशब्दोऽपि विप्रत्वजातौ यथा ब्रह्महत्येति, वेदे यथा ब्रह्मोज्झमिति, परमात्मनि च **"ब्रह्म वेद ब्रह्मैव भवति"** इत्यादिवाक्येष्विति अनेकार्थवाचकः। एवमीशानादिशब्दानामपि बह्वर्थवाचकत्वात् सूत्रकारैः **"रूढ्योः कलहे योगस्योन्मेषः"** इति न्यायेन यौगिकार्थकः शब्दः प्रयुक्त इति ज्ञायते। आत्मशद्वश्च आप्लृ व्याप्ताविति धातोर्मनिन् प्रत्यये बाहुलके तकारे च सति निष्पन्नः[12] व्यापकत्वं बोधयति। अत सातत्यगमने इति धातोः मनिन् कृते[13] वा निष्पन्नः सातत्यगमनार्थकः। **"यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह। यच्चास्य सन्ततेर्भावस्त-स्मादात्मेति गीयते।"** इति स्मृत्या जगज्जन्यस्थितिलयानां कारणत्वाद्यर्थं बोधयति। ईशानादिशब्दाश्च सविशेषतत्त्वस्यैव वाचकाः। ब्रह्मशब्दश्च "वृहि वृद्धौ"[14] इति धातोर्निष्पन्नः बृहत्वावाचकः। निरवच्छिन्नं बृहत्त्वञ्च परिच्छेदत्रयराहित्यं बोधयति। परिच्छेदाश्च देशतः, कालतः वस्ततश्चेति त्रिधा।" इहेदं नान्यत्रेति यथा घटः क्वचिद् देशविशेषे विद्यते देशान्तरे न विद्यत इति परिच्छेत्तुं शक्यत्वं देशपरिच्छेदः, अत्यन्ताभावप्रतियोगि-त्वमिति यावत्।" इदमिदानीं नान्यदा इति यथा घटः इदानीं विद्यते उत्पत्तेः प्राङ्नासीत् ध्वंसानन्तरं न भविष्यति इति परिच्छेदायोग्यत्वं कालापरिच्छेदः प्रागभाप्रति-योगित्वं ध्वंसाप्रति-योगित्वं वेति यावत्। "इदमिदं न" यथा घटः पटो नेति परिच्छेदार्हत्वं वस्तुपरिच्छेदः, अन्योन्याभावप्रतियोगित्वमिति यावत्। एवञ्च त्रिविधपरिच्छेदराहित्यबोधक-ब्रह्मपदेन व्यापकत्वं नित्यत्वमद्वितीयत्वञ्च विवक्षितानि। एतद्विवक्षानुगुणं प्रतिज्ञा-सूत्रस्थं ब्रह्मपदं सूत्रकाराणां तात्पर्यमात्मैकत्वविद्याप्रतिपादन इति श्रीशङ्करभगवत्पादानां "आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते" इति प्रतिज्ञावचनस्य सूत्रारूढत्वं सूचयति। तदुक्तं पद्मपादाचार्यैः "निरवग्रहमहत्त्वस्य वस्तुपरिच्छेदनिमित्ताल्पत्वस्ये-तरशेषत्वप्रयुक्ताल्पत्वस्याविद्याकामकर्मपारतन्त्र्यप्रयुक्तस्य वा निकर्षस्याभावबोधनेन नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मेति सिद्ध्य-तीति।'[15] भामतीकारैरप्युक्तम्-**"वृद्धिकर्मा हि बृहतिरतिशायने वर्तते। तच्चेदमतिशायनमनवच्छिन्नं पदान्तरावगमितं नित्यशुद्धबुद्धत्वाद्य-स्याभ्यनुजानाति"[16]** इति। अत्र पञ्चपादिका भाष्यकाराणां **"नित्यशुद्धबुद्धमुक्तस्वभावम्"** इति ब्रह्मणः स्वरूपप्रदर्शनस्य ब्रह्मशब्दा-नुगुण्यं दर्शयति। अत्र[17] शुद्धत्वम-सङ्गत्वम्, अविक्रियत्वमिति यावत् तच्चाबाध्यत्वे पर्यवस्यति। बुद्धत्वञ्च ज्ञानरूपतं स्वप्रकाशत्वमिति यावत्। मुक्तत्वञ्चानन्द-रूपत्वम् विवरणञ्च भाप्यस्य पञ्चपादिका-याश्चाशयमेवं वर्णयति ब्रह्मशब्दश्च बृह बृहि वृद्धावित्यस्माद्धा-तोर्निप्पन्नो महत्वमाचष्टे। तच्च महत्त्वं सङ्कोचकप्रकरणो पदयोरभावान्निरतिशयमेव सम्पद्यते।

ततो देशतः कालतो वस्तुतश्चान्तशून्यमित्युक्तं भवति। तथा बाध्यत्वजडत्वापुरुषार्थत्वादिदोषरा- हित्यमपि महत्त्वमेव। लोके दोपरहितेषु गुणवस्तु पुरुषेषु महापुरुषा इति व्यवहारदर्शनात्। ततो व्युत्पत्तिवशाद् यथोक्तेऽर्थे ब्रह्मशब्दो वर्तते। अत्र पञ्चपादिकायां कालकृतावच्छेदनिमित्ताल्पत्वस्य अभावः नित्यत्वपदेन भाष्ये उक्तम्। शुद्धबुद्धमुक्तेति विशेषणैः रूपवशिषाद्यवच्छेदकृताल्पत्व-स्याभावः भाप्य उक्तमिति वर्ण्यते। अस्येदमेव रूपं नान्यदिति रूपविशेपावच्छेद कृतपरिच्छिन्नत्वं घटादेः, ब्रह्मणस्तु निरूपत्वाददद्वितीयत्वाच्च तादृशपरिच्छेदाभावो ज्ञायते। एवञ्च ब्रह्मशब्देन जिज्ञास्यस्योपक्रमं-दर्शनाददद्वितीयब्रह्मवाद एव सूत्रकारा-णामभिप्रेत इति सामान्यतो निचितेऽधिकरणान्तराणां पर्यालोचने-नायमर्थो दृढीकरिष्यते।

अत्र ब्रह्मशब्देन व्यापकत्वस्य नित्यत्वस्य च बोधो भवतीत्यत्र विवादो नास्त्येव, सर्वैः सूत्रभाष्यकारैः ईश्वरस्य नित्यत्वं व्यापकत्वञ्च स्वीक्रियेत एव। श्रुतिश्च भवति **"सत्यं ज्ञानमनन्तं ब्रह्म"** इति। परन्तु ब्रह्मशब्देन वस्तुपरिच्छेदराहित्यबोधानेनाद्वितीयत्वं ब्रह्मसत्ता-कवस्त्वन्तरराहित्यं बोध्यत इति तु विचारार्हम्। यतः "इहेदं

नान्यत्रेति" परिच्छेत्तुमशक्यत्वं देशापरिच्छेदः", इदमिदानीं नान्यदेति "परिच्छेदायोग्यत्वं कालापरिच्छेदः इति स्वीक्रियते न तु देशकालाभावौ इति, अतः वस्त्वपरिच्छेदोऽपि वस्त्वन्तराभावो न स्यादपि तु" इदमिदं न भवतिः इति परिच्छेदानर्हत्वमेव, एचश्च सर्ववस्तुसामानाधिकरण्यार्हत्वं वस्त्वपरिच्छेद इति सिद्धम्, एतच्च सर्वेषां वस्तुजातानां सत्यत्व एव घटते, अशेष चिचित्रशरीरकस्य ब्रह्मणः सर्वतादात्म्यात् मृद् घटः, मृत्कपालः इति वत् सर्ववस्तुसामानाधिकरण्यार्हत्वं न तु वस्त्वन्तराभावनिमित्तम् अन्यथा अज्ञानप्रहाणाय शास्त्रमिदं प्रवृत्तमिति श्रीशङ्करभगवत्पादैः प्रतिज्ञातत्वात् स्वीकृते भावरूपाज्ञानं तत्कार्यज्ञातश्चेति वस्त्वन्तराभावरूपो वस्त्वपरिच्छेदः आत्मैकत्ववादेऽपि न सङ्ङ्गच्छेत। न च ब्रह्मसमसत्ताकवस्त्वन्तराभावः वस्त्वपरिच्छेदः, अज्ञानादीनां ब्रह्मसमसत्ताकत्वाभावान्न दोष इति वाच्यम्, प्रत्यक्षादिप्रमाणान्तरविरोधात् वस्त्वन्तरं सत्यं ब्रह्मसमसत्ताकं नास्तीति वक्तुं न शक्यते। प्रत्यक्षादिप्रमाणानां बाध्यत्वं ब्रह्ममात्रविषयकत्वं वैतत् ब्रह्मशब्दः निर्विशेषाद्वितीयतत्त्ववाचकः इति निश्चयोत्तरकालं निर्णयम्, ततः पूर्वं ब्रह्मशब्दः सूत्रे प्रयुक्तः कीदृशं वस्तुपरिच्छेद राहित्यं बोधयतीति जिज्ञासायां प्रत्यक्षादिप्रमाणानाम-बाधेनैवोपपादनीयम् अन्यथा ब्रह्मशब्दः सत्यवस्त्वन्तराभाववाचक इति निश्चिते प्रत्यक्षदीनामतत्त्वावेदकत्वम्, प्रत्यक्षादीनातत्त्वावेदकत्वे निश्चिते ब्रह्मशब्द सत्यवस्त्वन्तराभाववाचकः इति निश्चय इति परस्पराश्रयताप्रसङ्गः स्यात्। अतः ब्रह्मशब्देन नित्यत्वं व्यापकत्वं सर्ववस्तुसामानाधिकरण्यार्हत्वञ्च बोध्यन्ते। अथवा "इदमियदिति वस्तुस्वभावतः परिच्छेदाभावः वस्त्वपरिच्छेदः, तद्यया सुवर्णमुत्कृष्टं कलधौतादि चापकृष्टम्, सुवर्णेष्वपि षड्वर्णस्वर्णापेक्षया दशवर्णस्वर्णमुत्कृष्टम्, गुरुत्वोज्वलत्वपवित्रत्वादिभिः प्रकर्षात् इति व्यवहारात् प्रकर्षस्य सातिशयत्वं वस्तुपरिच्छेदः, प्रकर्षस्य निरतिशयत्वं वस्त्वपरिच्छेदः। "पुरुषान्न परं किञ्चित् सा काष्ठा सा परागतिः"[18] इति भगवद्वचनात् ज्ञानैश्वर्यादिगुणानां काष्ठापन्ने पुरुषोत्तमे भगवति एतादृशवस्तुपरिच्छेदराहित्यं घटत इति वस्तुपरिच्छेदराहित्यबोधकब्रह्मशब्दसामर्थ्यादात्मैकत्ववादः सूत्राभिप्रेत इति वक्तुं न शक्यत इति चेदत्रोच्यते-

ब्रह्मशब्दः त्रिविधपरिच्छेदराहित्यवाचक इति तु सर्वसम्मतमेव। तत्र देशपरिच्छेदाभावः देशाभावं न बोधयति अपि त्वत्यन्ताभाव-प्रतियोगित्वाभावं बोधयति, घटादयस्तु क्वचिद्देशे सन्ति क्वचिन्न सन्तीति अत्यन्ताभावप्रतियोगिनः। ब्रह्मणि अत्यन्ता भाव प्रतियोगित्व नास्ति व्यापकत्वादतः अत्यन्ताभावाप्रितियोगित्वरूपो देशपरिच्छेदाभावः सिद्धयति। कालपरिच्छेदाभावोऽपि ध्वंसाप्रतियो-गित्वं प्रागभावाप्रतियोगित्वं वा ब्रह्मणो नित्यत्वात् सिद्ध्यति। एवं देशपरिच्छेदाभावस्य कालपरिच्छेदाभावस्य चाभावाप्रतियोगित्वरूपे सिद्धे एतदानुगुण्येन वस्तुपरिच्छेदाभावस्यापि अभावाप्रतियोगि-त्वरूपमेव वक्तुमुचितम्। अभावश्च चतुर्विध इति नैयायिकाः, प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावः, अन्योन्याभावश्चेति। तत्र प्रागभावप्रध्वंसाभावात्यन्ताभावानामप्रतियोगित्वे ब्रह्मणि ज्ञाते परिशेषन्यायेनान्योन्याभावाप्रतियोगित्वं ब्रह्मणि अस्ति न वेति विशये वस्तुपरिच्छेदाभावमा- श्रित्यान्योन्याभावाप्रतियोगित्वमेव सिद्ध्यतीति वक्तुमुचितम्। न च प्रामाणन्तर विरोध इति वाच्यम्, प्रत्यक्षादिप्रमाणैः ब्रह्मसमसत्ताकमिदमिति गृह्यत इतीदानीं निश्चयाभावात्। अत एव नान्योन्याश्रयप्रसङ्गोऽपि, प्रयत्क्षादीना-मतत्त्वावेदकत्वं तत्त्वावेदकत्वं वेदानीं न निश्चितम्। ब्रह्मशब्देन सूत्रकाराणामुपक्रमात् सविशेषस्यैव विचारः प्रस्तुत इति नास्ति सविशेषनिर्विशेषोभयसाधारणस्यैव विचारः प्रस्तुत इति ज्ञाते उत्तरत्राधिकरणानां विवेचनेन निर्विशेषं ब्रह्म सूत्रकारैः स्वीकृतं न वेति प्रतिपादयिष्यत इति भाष्यकारणां गूढाभिसन्धि :। अत एव भाष्यकारैः ब्रह्म प्रसिद्धमप्रसिद्ध वेति विमर्शपुरस्सरं ब्रह्मणि विप्रतिपत्तीनां निरूपणावसरे स्वमतमपि "आत्मा स भोक्तुरित्यपरे"[19] इति एकात्मवादः विमतत्वेन प्रदर्शितः। अथवा सर्ववस्तुसामानाधिकरण्यार्हत्वं प्रकर्षस्य निरतिशयत्वं वा वस्त्वपरिच्छेदो भवतु तथापि निर्विशेषस्य बोध स्तु भवत्येव। तथाहिसामानाधिकरण्यं तावच्चतुर्धा भवति अध्यासे "इंद रजतमित्यादौ", बाधायां "स्थाणुः पुमानि" त्येवमादौ, विशेषणविशेप्यभावेन "नीलमुत्पलम् इत्यादौ, अभेदेन "सोऽयं देवदत्तः" इत्यादौ। अत्र च बाधायां सामानाधिकरण्यं वक्तुं शक्यते सर्व ब्रह्मैवेति, सर्व वस्तु घटपटादिरूपेण यज् ज्ञातं तद् ब्रह्मैवेति ब्रह्मातिरिक्तवस्त्वन्तराभावरूप एकात्मवादः सिद्ध्यति। एकत्वात् स्वप्रकाशत्वाच्च सातिशयत्वानुपपत्त्या प्रकर्षस्य निरतिशयत्वादात्मनि वस्त्वपरिच्छेदोऽपि एकात्मवादे सङ्गच्छत एवं ब्रह्मशब्दान्निर्वि-शेषस्य बोधं स्मृतिरपि समर्थयति-

**प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरम्।**

**वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ।।[20] इति ।।**

जिज्ञासापदमपि एकात्मविद्यां मोक्षहेतुत्वेन प्रतिपादयति। तथाहि "अथातो धर्मजिज्ञासे"-ति पूर्वमिमांसाऽऽरब्धा, अतः धर्मज्ञान-प्रयोजनाय शास्त्रमिदं प्रणीतमिति स्वीक्रियते, एवमेवोत्तरमीमांसापि "अथातो ब्रह्मजिज्ञासे"-ति आरब्धेति ब्रह्मज्ञानमेवात्र शास्त्रस्य प्रयोजनं वक्तव्यम्। धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु धर्माख्यपुरूवार्थ-कामायादौ धर्मज्ञानं निश्चितमपेक्षितमिति तदर्थं धर्ममीमांसाध्ययनम्, ततो ज्ञातो धर्मोऽनुष्ठित सुखादिशेषतया पुरुषार्थो भवति। एवं मोक्षाख्यपुरुषार्थकामस्य अधीतवेदस्य "ब्रह्मविदाप्नोति परम्"[21] "तरति शोकमात्मविद्"[22] इत्यादिवाक्येभ्यः ब्रह्मज्ञानं मोक्षसाधन-मिति ज्ञातस्य ब्रह्मतत्त्वज्ञानार्थं ब्रह्ममीमांसाशास्त्रं प्रवर्तते। तत्र ब्रह्मतत्त्वज्ञानं कथं मोक्षसाधनमिति विचारे धर्मजिज्ञासायां यदुक्तं धर्मानुष्ठानद्वरा पुरुषार्थोपयोगित्वं धर्मज्ञानस्य तथा ब्रह्मज्ञानस्येति वक्तुं न शक्यते । धर्मज्ञानस्य विषयभूतो धर्मः यागादिक्रियात्मको भव्यः, ज्ञानकाले नास्ति, ब्रह्मज्ञानस्य विषयभूतं ब्रह्म भूतं ज्ञानकालेऽपि अस्ति, अतः कार्यान्तिरेण विना ज्ञानादेव मोक्ष इति

वक्तव्यम्। ज्ञानञ्चाज्ञाननिवृत्तिद्वारैव मोक्षजनकमिति स्थितम्, यतः अज्ञानमज्ञानप्रयुक्तं वा ज्ञानेन निवर्तते न तु तद्भिन्नम्। शुक्तिरजतादिस्थले तथा दर्शनात्। अतः सूत्रकाराणामभिप्रायः सर्वमिदं ब्रह्माज्ञानप्रयुक्तं ब्रह्मज्ञानेन एतन्निवृत्त्या पुरुषार्थ मोक्षः सिद्ध्यतीति ज्ञायते। ब्रह्मणश्च ज्ञातुः भिन्नत्वेऽन्यज्ञानादन्यत्रा-ज्ञानानिवृत्तेः ब्रह्मैव ज्ञाता (प्रमाता) प्रमाता एव ब्रह्मेति एकात्मवादे पर्यवस्यति। एवञ्च ब्रह्मशब्दसामथ्यात्याजिज्ञासा-शब्दसामर्थ्याच्च सूत्रकारैर्निर्विशेषवादोऽपि सूचित इंति सिद्धम्। एवं च सविशेषनिर्विशेषसाधारणब्रह्मशब्देन मीमांसाशास्त्रमिदमारव्यमिति ज्ञाते तस्य किं लक्षणमिति जिज्ञासायां तथैवोभय साधारणमेव लक्षणमुक्तम्-" जन्माद्यस्य यत" इति ज्ञायते। अस्य नामरूपाभ्यां ल्याकृतस्य जगतः जन्मस्थितिलयाः यस्मात् कारणाद् भवन्ति तद्ब्रह्मेति सूत्रार्थः। अत्र भावत्पादानामयमाशयः द्विरूपं हि ब्रह्मावगम्यते-नामरूपविकारभेदो पाधिविशिष्टं, तद्विपरीतश्च सर्वोपाधि विवर्जितम्। "यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्" "यत्र नान्यत् पश्यति नान्यच्छणोति नान्यद्विजानाति स भूमाथ यत्रान्यत्पश्यत्यन्यच्छृणो-त्यन्यद्विजानाति तदल्पं यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यम्"[23] "सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन्यदास्ते"[24] , "निष्कलं निष्क्रिय शान्तं निरवद्यं निरञ्जनम् अमृतस्य परं सेतुं दग्धेन्धनमिवानलम्", "नेति नेति", इति श्रुतयः, "न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा। इति मां यो विजानाति कर्मभिर्न स बध्यते।" " अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः"[25] "नाहं भक्षितवानम्ब सर्वे मिथ्याभिशंसिनः"[26] इति स्मृतयश्च विद्याविद्या-विषयभेदेन ब्रह्मणो द्विरूपतां दर्शयन्ति। तत्राविद्यावस्थायां ब्रह्मणः उपास्योपास-कादिलक्षणः सर्वो व्यवहारः।

तत्राप्युपासनानि कानिचिदभ्युदयार्थानि, कानिचन क्रममुक्त्यर्थानि, कानिचिच्च कर्मसमृद्ध्यर्थानि इति गुणविशेषोपाधिभेदेन भेदः। एक एव तु परमात्मेश्वरः तैस्तैर्गुणविशेषैर्विशिष्ट उपास्यो भवति। गुणविशेषोपाधिरहितश्च स एव ईश्वरः श्रेयं निर्विशेषं ब्रह्म भवति, यज्ञानाच्च मोक्ष इति तस्य निर्विचिकित्सज्ञानसिद्धये शास्त्रमिदमा-रब्धम्। तत्र ब्रह्मज्ञानमुपाधि विशेषद्वरेण उपदिश्यमानमपि अविवक्षितोपाधिसम्बन्धविशेषं निर्विशेषं लक्षयति इति सूत्रकारैः सविशेषस्य लक्षणद्वारा निर्विशेषस्यापि लक्षणमत्र सूत्रितम्। यदुक्तं भाष्यकारैः "प्रथमेऽध्याये सर्वज्ञः सर्वेश्वरो जगत उत्पत्तिकारणं मृत्सुवर्णादय इव घटरुचकादीनाम्। उत्पन्नस्य जगतो नियन्तृत्वेन स्थितिकारणं मायावीव मायायाः। प्रसारितस्य जगतः पुनः स्वात्मन्येवोपसंहारकारणमवनिरिव चतुर्विधस्य भूतगामस्य। स एव च सर्वेषां न आत्मेत्येतद्वेदान्तवाक्यसमन्वय-प्रतिपादनेन प्रतिपादितम्" इति। एतादृशकारणत्वं मायिकस्य प्रपञ्चस्य विवर्तोपादानकारणभूते निर्विशेषब्रह्मणि सङ्ङ्गच्छत एव। अत्र "जन्माद्यस्य यतः" इति सूत्रम्। "क्षित्यङ्करादिकं कर्तृजन्यम्, कार्यत्वादि" ति नैयायिकादीनामिवानुमानोपन्यासार्थं न प्रवृत्तमपि तु ब्रह्मस्वरूपप्रतिपादने प्रवृत्तानां वेदान्तवाक्यानां प्रदर्शनार्थमिति सर्वेषां ब्रह्ममीमांसाभाष्यकाराणामैक-मत्यम्, ब्रह्मणो वेदान्तैकवेद्य-त्वस्य "तन्त्वौपनिषदं पुरुषं पृच्छामि " इत्यादिश्रुतिसिद्धस्य सर्वैरप्याचार्यैः स्वीकारात्। तानि च वेदान्तवाक्यानि 'भृगुर्वे वारुणिः। वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति इत्युपक्रम्य यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व। तद् ब्रह्मेति[27] सामान्यतः अस्य जगतो जन्मस्थितिनाशाः यतः कारणाद् भवन्ति तद् ब्रह्मेति प्रतिपादयन्ति।

तत्र किं तत् कारणं जगतः प्रधानादिकमचेतनमुतान्यदिति विशये श्रुतेः निर्णयवाक्यम्- "आनन्दाद्धये रवल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति।" अनेन चानन्दरूपत्वं ब्रह्मणो ज्ञायते। "आनन्दो ब्रह्मेति व्याजानात्"[28] "रसो वै सः" "विज्ञानमानन्दं ब्रह्म"[29] इत्यादिवाक्येभ्योऽपि आनन्दस्यैव ब्रह्मत्वं ज्ञायते। "गतिसामान्याद्" इति न्यायेन च सूत्रकाराः सर्वेषु वेदान्तेषु मूलकारणं प्रतिपिपादयिषितमेकमेवेति च प्रतिपादयन्ति।

अस्य चानन्दस्य सविशेषत्वं निर्विशेषत्वं वेति विमर्श लोके विषयसम्बन्धादेवानन्दस्य सविशेषत्वदर्शनाद्विषयोपाधिविनिर्मुक्त-स्यानन्दस्य निर्विशेषत्वमेव निश्चीयते। सत्त्वरहितस्य तस्यानन्दस्य शून्यत्व-प्रसङ्गात् तस्य ज्ञानरूपत्वं वक्तव्यमिति सच्चिदानन्दरूपं निर्विशेषं ब्रह्म जगतः कारणमत्र विवक्षितमिति सिद्ध्यति। श्रुतिवाक्यानि च "सत्यं ज्ञानमनन्तं ब्रह्म", "यो वे भूमा तत्सुखम्" "आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन" इत्यादिवाक्यानि एतदर्थस्यैव समर्थनाय प्रवृत्तानि । एवञ्च "जन्मायस्य यतः" इति सूत्रे जगज्जन्मादिकारणत्वं सविशेषब्रह्मणः स्वरूपलक्षणम् निर्विशेषस्य तटस्थलक्षणं भवति। निर्णयवाक्येन बोधितं 'सत्यं ज्ञानमनन्तं ब्रह्म' 'आनन्दं ब्रह्म' इति तु निर्विशेषस्य स्वरूपलक्षणमिति द्वितीयसूत्रं भगवत्पादानां मते स्पष्टं सङ्गच्छते।

जगज्जनमादिकारणत्वञ्चोपलक्षणविधया काकाधिकरणत्ववन्निर्विशेषं लक्षयति। काकोपलक्षितं देवदत्तगृह-मित्यत्र यथा काकाधिकरणत्वं हि न गृहेऽन्तर्भवति, तथा सति काकविगमे गृहैकदेशभङ्गबुद्धिप्रसङ्गात्। अतो गृहस्याधिकरणत्त्वं नामौपाधिको धर्मः, स च परिशेषाल्लक्षणे एवान्तर्भवति। तन्निरूपकस्य काकस्य यथा लक्षणत्व तथा कारणत्वमौपाधिको धर्मः लक्षणान्तःपाती ब्रह्म निर्विशेषं लक्षयतीति निश्चीयते। लक्षणवाक्यानाञ्च अखण्डवस्तुप्रतिपादने तात्पर्यमिति लक्षणसद्भावादेव लक्ष्यस्य सविशेषत्वमिति शङ्ङ्काया नावकाशाः। यथा 'कश्चन्द्रः' इति प्रश्नस्योत्तररूपेण प्रवृत्ते चन्द्रलक्षणवाक्ये "प्रकृष्टप्रकाशश्चन्द्र" इत्यत्र प्रकृष्टप्रकाशशब्दौ प्रकर्पप्रकाशत्वरूपस्वार्थ-बोधनद्वारा तदाश्रयं बुभुत्सितं चन्द्ररूपं व्यक्तिविशेषमखण्डं लक्षयत इति तत्र स्वीक्रियते तथाऽत्रापि लक्षणमस्तीति मात्रेण ब्रह्म सविशेषमेव भवेदिति वक्तुं न शक्यते। एवञ्च यथा शुक्तिकाज्ञानसहितशुक्तिकोपादानं रजतं शुक्तिकायां सत्यामस्ति

शुक्तिकायामेव च लीयते तथाविद्यासहितब्रह्मोपादानं जगद् ब्रह्मण्येवास्ति तत्रैव च लीयत इति सिद्धम्। इदं जगज्जन्मादिकारणत्वरूपं लक्षणं निर्विशेषे ब्रह्मणि सङ्ङ्गच्छत इत्यत्र द्वितीयाध्यायस्य तृतीयपादस्य "असम्भवस्तु सतोऽनुपपत्तेः" इति तृतीयाधिकरणात्मक सूत्रमपि प्रमाणम् अत्र वियत्पवनयो असम्भाव्यमानजन्मनोरपि उत्पत्तिं श्रुत्वा स्यात् कस्यचिद्भ्रान्तिरनयोः यत् कारणमर्थान् मूलकारणं ब्रह्मापि उत्पद्यत इति तद् वारणाय ब्रह्मण उत्पत्तिं प्रतिषेधति श्रीसूत्रकारः। अत्र सूत्रे परं ब्रह्म सच्छब्देन व्यपदिष्टम्। एवञ्च ब्रह्माकाशादीनां कारणं सद्रूपम्, सद्रूपत्वादेव ब्रह्मणः विधिरूपत्वाद्भावश-ङकैवानुपपन्ना, असतो निरात्मकत्वादेव न सद्रूपस्योत्पत्तिसम्भवः अतः सन्मात्रमेव ब्रह्मेति तद्भिन्नं सर्वमसद्रूपमाविद्यकमतः निर्विशेषं मूलकारणं ब्रह्मेति सूत्रकाराणा-माशयो ज्ञायते। उपासनार्थं सविशेषस्यापि विचारः ब्रह्ममीमांसायां कर्तव्योऽस्तीत्यभिप्रायेण जिज्ञास्यस्य लक्षणनिरूपणप्रसङ्गे सविशेष-निर्विशेपोभयसाधारणमेव लक्षणं सूत्रकारैः प्रदर्शितम्। एवं जिज्ञास्यस्य ब्रह्मणः लक्षणनिरूपणानन्तरं प्रमाणजिज्ञासायां "शास्त्रयोनित्वात्"[30] इति सूत्रेण ब्रह्मणः शास्त्रैकगम्यत्वं प्रतिपाद्यते।

अत्र भाष्यकारैः शास्त्रस्य योनिः कारणं ब्रहोति प्रथमवर्णकेन सर्वज्ञत्वं ब्रह्मणो लक्षणमिति पूर्वसूत्रसिद्धस्यैव दार्ढ्यार्थमिदं सूत्रमिति व्याख्यातम्। द्वितीयवर्णकेन च ब्रह्मणः यथावत् स्वरूपाधिगमे शास्त्रमेव प्रमाणमिति प्रदर्शितम्।

"तत्तु समन्वयाद्"[31] इति चतुर्थसूत्रञ्चोपक्रमोपसंहारादिलिङ्गैः वेदान्तानां सिद्धे ब्रह्मण्येव तात्पर्यमिति प्रतिपादयति। एवञ्च चतुर्भिरधि करणैः सविशेषनिर्विशेषोभयसाधारणब्रह्मणः जिज्ञास्यत्वे-नोपक्रमः,सविशेषनिर्विशेषोभयसाधारणलक्षणकथनम्, उभयब्रह्मणोः शास्त्रैकसमधिगम्यत्वम्, शास्त्रस्य तत्र तात्पर्यवत्त्वमिति सूत्रकारैः प्रतिपादितम्। उत्तरात्रधिकरणेषु चैकमपि ब्रह्मणोपासनार्थमपेक्षितो-पाधिसम्बन्धं सविशेषमुपास्यं भवति निरस्तोपाधिसम्बन्धञ्च निर्विशेषं ज्ञेयमिति वेदान्तेषूपदिश्यत इति प्रदर्शननार्थं परापरविष-यत्वेन सन्दिह्यमानानां वेदान्तवाक्यानां वाक्यगतिपर्यालोचनया निर्णयो भविष्यति, आपाततः अचेतनकारणपरत्वेन प्रतिपन्नानां वाक्यानामपि ब्रह्मविपरीतकारणपरत्वनिषेधेन तात्पर्यनिर्णयोपि भविष्यति प्रथमाध्याये। द्वितीयाध्याये च समन्वयाध्याये प्रतिपादितस्य सिद्धान्तस्य विरोधपरिहारः करिष्यते। तृतीये चाध्याये मोक्षसाधानां भविष्यति निरूपणम्, चतुर्थाध्याये च मोक्षस्वरूपनिरूपणं करिष्यते। तत्र तृतीयेऽध्याये द्वितीये पादे पञ्चमाधिकरणे श्रुतीनां तात्पर्यं मुख्यं निर्विशेषब्रह्मणि सविशेषे वेति विशये "अरूपवदेव हि तत्प्रधानत्वात्" "आह च तन्मात्रम्" इत्यादिसूत्रैः निर्विशेषब्रह्मण्येवेति मुखत एवं प्रतिपादितम्। "अथात आदेशो नेति नेति" " अन्यदेव तद्विदितादथो अविदितादधि" "ब्रह्मन् ब्रह्मण्यनिर्देश्ये निर्गुणे गुणवृत्तयः। कथं चरन्ति श्रुतयः साक्षात् सदसतः परे" इति प्रश्नस्य श्रुतीनामेवोत्तरम् - "त्रिगुणमयः पुमानिति भिदा यदबोधकृता त्वयि न ततः परत्र स भवेदवबोधरसे" इति श्रीमद्भागवते निर्विशेषस्य प्राधान्यं प्रदर्श्यते इति श्रुतिस्मृतयश्चात्र प्रमाणम्।

चतुर्थेऽध्याये च मुख्यमोक्षस्य किं स्वरूपमिति विमर्शे चतुर्थपादे प्रथमाधिकरणे 'सम्पद्याविर्भावः स्वेन शब्दात्" "मुक्तः प्रतिज्ञानात्" इति सूत्राभ्यां मोक्षो नित्यसिद्धः अज्ञानिवृत्तिमात्रेणाविर्भूतो भवति यथा रोग निवृत्तावरोगोऽभिनिष्पद्यते इति व्यवह्रियते तद्वदिति प्रतिपादनेनापि निर्विशेषवादः सिद्धो भवति। एवञ्च भगवत्पादानां सिद्धान्तः सविशेषं ब्रह्मोपासनार्थ वर्णितं वेदान्तेषु स्वीकृतमेव, निर्विशेषं ब्रह्म मुख्यतात्पर्यवत्त्वेन प्रतिपाद्यते यज्ज्ञानाच्च मोक्षः, यदर्थञ्च शास्त्रमिदं प्रवृत्तमिति सूत्राक्षरैरपि ज्ञायत इति दिङ्मात्रमिह निरूपितम्।

अयमेवौपनिषदानां सिद्धान्त इति न केवलं केवलाद्वैतिनो वर्णयन्ति अपि तु तार्किकाः श्रीमदुदयनाचार्याः श्रीजयन्तभट्टादिप्रभृतयश्च, वैय्याकरणा भर्तृहरिप्रभृतय, मीमांसका भट्टाचार्यादियोऽपि वर्णयनित। तथाहि-श्रीमन्तः उदयनाचार्याः- अस्तु तर्हि शून्यतैव परमनिर्वाणमिति चेन्न। सा हि यद्यसिद्धा, कथं तदवशेषं विश्वम्? परतश्चेत् सिद्धा, परोऽप्युपगन्तव्यः, स च परो यदि संवृत्तिरेव विश्वशून्ययोर्न कश्चिद्विशेषः, कथं तदप्यवशिष्येत, असंवृतिश्चेत् परः परत एव सिद्धा अनवस्था। स्वयमसिद्धा चेत्, कथं शून्यत्वमपि साधयेत्। स्वतः सिद्धा चेदायातोऽसि मार्गेण। तथाहि- स्वतः सिद्धतया तदनुभवरूपम्, शून्यत्वादेव न तस्य कालावच्छेद इति नित्यम्। अत एव न तस्य देशावच्छेद इति व्यापकम् । अत एव तस्य विशेषाभाव इत्यद्वैतम्। प्रपञ्चस्यापारमार्थिकत्वादेव निष्प्रतियोगिक-मिति विधिारूपम्"।[32] इति वेदान्तसिद्धान्तं "तब्दाधने वलिनि वेदनये जयश्रीः" इति दर्शनानां दर्शनीयतममिति वर्णयन्ति। श्री जयन्तभट्टैश्च **"तत्र वेदान्तिनः आहुः- नित्यसुखमात्मनो महत्त्ववदस्तीति आगमप्रामाण्यादुपगम्यताम्। तच्च संसारदशायामविद्यावरणेन न दृश्यते"[33]** इत्युक्तम्। श्रीभर्तृहरिश्च यत्र द्रष्टा च दृश्यञ्च दर्शनञ्चापि कल्पितम्। तस्यैवार्थस्य सत्यत्वामाहुस्त्रय्यन्तवेदिनः"[34] इति। भट्टाचार्याश्च- **"द्वैतपक्षात्पराणुद्य बुद्धयसिद्धिसमाश्रयात्। परमात्मान-मेवैकं तत्त्वं तत्त्वविदो विदुः"[35]** इति वदन्ति ।

एवञ्च निर्विशेषब्रह्मवादस्य वेदान्तसिद्धन्तत्वेन नैयायिकैः वैयाकरणैः मीमांसकैश्च स्वीकृतत्वाच्च श्रीशङ्करभगवत्पादानां सिद्धन्तस्य सूत्रारूढत्वं निश्चप्रचम्।

**"तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः"** इति विष्णुसूक्ते यत्स्वप्रकाशं विष्णुतत्त्वं विद्यावतां श्रुतन्तदेव निर्विशेषब्रह्मवादरूपे-णोपनिषत्सु प्रवृत्तं पुराणेषु स्मृतिषु ब्रह्ममीमांसादर्शने च श्रीबादरायणाचार्यैः वर्णितं श्रीशङ्करभगवत्पादैः युक्तिभिः बौद्धादिनास्तिकवादानां निरासपूर्वक प्रकाशपथमानीतम्। अतः शङ्करभगवत्पादानां सिद्धान्तस्य नास्तिकवादत्वं कथमपि न सङ्गच्छत इति निरूपणपूर्वकम्- **"सिद्धान्तरीतिषु मया भ्रमदूषितेन स्यादन्यथापि गदितं यदि किञ्चिदत्र। तच्छोधने सहृदया सदया भवन्तु सच्छास्त्रतत्त्वपरिशीलननिर्विशङ्काः।"** इति प्रार्थनया सह विरम्यते।

**पाद टिप्पणी:**

[1]श्रीकण्ठभाष्यम्, पृष्ठ-६

[2]श्रीशाङ्करभाष्यम्, पृष्ठ-४५

[3]बृ.उ. २.३.६

[4]श्रीमद्भागवतम्, पृष्ठ-481, अत्र श्रीधरीव्याख्या-सत्यस्य सत्यम्-तस्यैव सत्यस्य सत्यं पारमार्थिकम्, तन्नाशेऽपि अवशिष्यमाणत्वात्। द्वैतञ्च सर्वं तद्व्यतिरेकेण नास्ति इति वक्तुं द्वैतप्रपञ्च वृक्षरूपेण निरूपयन्ति। त्वन्मायया संवृतं निहितं चेतो ज्ञानं येषान्ते त्वामेव नाना पश्यन्ति। ये तु विपश्चितो विद्वांसस्ते तथा न पश्यन्ति। इति। दशमरकन्दे द्वितीयाध्याये।

[5]शतभूषणी पुस्तके,पृष्ट-१११

[6]सामंती, पृष्ट-४२४

[7]बृहदारण्यकोपनिषत्

[8]तैत्तिरीयोपनिषत्

[9]ऐतरेयोपनिषत्

[10] तर्कसङ्ग्रहः

[11] ब्रह्मसूत्रे भामतीकल्पतरुव्याख्याने परिमले, पृष्ठ-277

[12] ब्रह्मसूत्रे भामतीकल्पतरुव्याख्याने परिमले, पृष्ठ-277

[13] अमरकोश रामाश्रभी टीका।

[14] बृहति वृंहयति तस्मादुच्यते परं ब्रह्म, बृहत्वाद् वृंहणत्वाच्च ब्रह्मेति परिपठ्यते श्रुतिप्रकाशिका पृष्ठ-233

[15] पञ्चपादिका, १.१.१

[16] भायती पृष्ट-८०

[17] अत्र विवरणानुसारेण नित्यत्वादयः व्याख्याताः। भामती तु नित्येति क्षयितालक्षणं दुःखमुपक्षिपति। शुद्धेति देहाद्युपाधिकमपि दुःखमपाकरोति। बुद्धेत्यपराधीन-प्रकाशमानन्दात्मानं दर्शयति। आनन्दप्रकाशयोरभेदात्। इति विवेचयति ।

[18] श्रीमद्भगवद्गीता

[19] श्रीशाङ्करभाष्यम् १.१.१

[20] विष्णुपुराणाम्।

[21] तैत्तिरीयोपनिषत्

[22] छान्दोग्योपनिषद्।

[23] छान्दोग्योपनिषद्

[24] श्वेताश्वतरोपनिषद्

[25] श्रीमद्भगवद्गीता

[26] श्रीमद्भागवतम्

[27] तैत्तिरीयोपनिषद्

[28] तैत्तिरीयोपनिषद्

[29] बृहदारण्यकोपनिषद्

[30] ब्रह्मसूत्रम्- १.१.३

[31] ब्रह्मसूत्रम्-१.१.४

[32] गौडब्रह्मानन्दीटीकातः उद्धृतम् , पृष्ठ-२२२

[33] न्यायमञ्जरी

[34] वाक्यपदीयम्

[35] श्लोकवार्तिकम्